IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# संज्ञासूत्रसञ्चरणविधिः

**Dr. Giridhari Panda**
**Coordinator,**
**MC Research Centre in Humanities &Soc.Sc.**
**Assistant Professor,**
**Department of Sanskrit (UG & PG)**
**Midnapore College (Autonomous)**

**Key Words- सूत्रम्,संज्ञा,परिभाषा,यथोद्देशसंज्ञापरिभाषम्, कार्यकालसंज्ञापरिभाषम्,**

## Abstract (शोधसारः) -

अल्पाक्षरमसंग्दिग्धं सारवत् विश्वतोमुखमिति लक्षणं यस्य कृते सर्वथोद्दिष्टं तत्सर्वथा सूत्रमिति नाम्ना प्रथितं जायते शास्त्रीयजगति । पाणिनीयाष्टाध्याय्यां प्रायशश्चतुःसहस्राणि सूत्राणि प्रायशः षड्विधेषु विभक्तानि भवन्ति। तत्र कानिचित् सूत्राणि सज्ञाः प्रकुर्वान्ति, अन्यानि च ताः संज्ञाः समाधृत्य विधानम्, नियमनम् अतिदेशं विधीयन्ते, अधिकार वा प्रदर्शयन्ति परिभाषाक्षेत्रं वा परिभाषन्ते। अष्टाध्याय्यां संज्ञासूत्राणि सन्ति, यानि सर्वतोभावेन विध्यङ्गभूतानि भवन्ति इति भाष्यकृता परीक्ष्य सिद्धान्ती व्युत्पादितः स्थापितश्च। विधिसूत्रसंघटनदशायां व्युत्पादितानि यानि पारिभाषिकपदान्यनस्यूतानि सन्ति, तेषां पारिभाषिकानां पदानां यथार्थबोधनं संज्ञासूत्रामुद्येश्यमात्यन्तिकं लक्ष्यं च प्रतिसूत्रं संज्ञाशास्त्रमुपस्थाय पर्य्यालोचनपुरस्सरं पदगतस्य अर्थस्य रहस्योन्मोचनं साधयति इयं सा प्रक्रिया संज्ञासूत्राणां सञ्चरणप्रक्रिया इति नाम्ना अवधीयते। संज्ञासूत्रं निरवधिकतया सर्वेषु सूत्रेषु उपतिष्ठत इत्येव शास्त्रविधानविचारः। एतस्य कृते सपादसप्ताध्यायी त्रिपादी[1] इति किमपि बन्धनं नोपकल्पयितुं शक्यते । चारचक्षुषराजानो भवन्तीतिरीत्या संज्ञासूत्रं परिभाषासूत्रं च सर्वत्र निर्वाधं प्रवृत्तिं लभते। किं बहुना संज्ञाशास्त्राणां कृते संचरणमुपायद्वयेन अङ्गीक्रियते। यथोद्येशं संज्ञापरिभाषं कार्यकालं संज्ञापरिभाषञ्चेति । व्याडितः आरभ्य शेषाद्रिसुद्धी इति यावत् परिभाषावचनद्वयं इदं सर्वत्र परिभाषाजगति विवेचनीयं वर्तते। संज्ञासूत्राणि विध्यङ्गभूतानि इति भाष्यसिद्धान्तात् विधिशास्त्रस्य उपातानां पदानां तात्पर्यबोधनाय प्रयोजनीयत्वम् अङ्गीकृत्य प्रवर्त्तन्ते । तथ्यमेतदत्रानुशीलनेन विचारात्मकदिशा प्रतिपादनं विधीयते।

[1] . पा.सू.- 8.2.1

पदसाधुत्वोद्येश्येन रूपायिते संकीर्तिते च व्याकरणशास्त्रे विधिसूत्रं मुख्यमवलम्बनं विधत्ते। विशेषतः पाणिनीयव्याकरणे सूत्रविभाजनं षड्विधं सत् परस्परमापेक्षिकं सम्बन्धं गृहीत्वा प्रवृत्तिपथं प्रविशति। न किमपि सूत्रं किमपि एक सूत्रं विहाय कार्यं साधयितुं नैव शक्नोति। प्रयोजनानुसारं सूत्राणि सम्बन्धितं स्थानं संप्रवर्त्तन्ते। तेषु प्रसिद्धिं गतेषु सूत्रेषु विधिसूत्रं प्रामुख्यं भजते। एकस्यैव विधिसूत्रस्य सर्वतोभावेन तात्पर्यप्रतिपत्तये संज्ञादीनि सूत्राणि प्रतिष्ठन्ते। किं बहूना विषयविन्यासं सजातीयतया परिगृह्य अधिकारभावेन अवधिविभाजनं पाणिनौ कर्तव्यं दृश्यते। तस्मिन्नेवाधिकारे तद्भूतानि तदृदृष्टानि च कार्याणि प्रयत्न इति तद्भावः। समाकलनं कर्त्तव्यं चेत् अष्टाध्याय्यां ७५ संख्यकानि अधिकारसूत्राणि संकीर्त्तितानि सन्ति। विषयविन्यासं प्रतिनिविषति। विधिप्रकारेषु कार्यप्रकारादिवचना स्थानितुल्यं आदेशतुल्यं च आदाय आतिदेशिकम् अन्यत् किमपि विधिवैचित्र्यम्। संकोचनप्रकारसाधने नियमप्रदर्शनम् एकम् अन्यत् प्रतिकल्पनम्। एतेषु सर्वेषु विवेचनीयेषु विचारेषु संज्ञा परिभाषासूत्राणां सहवन्धनमेकमन्यद् वैचित्र्यं विशदीकरोति ।

पाणिनीयाष्टाध्याय्यां प्रायशश्चतुःसहस्राणि सूत्राणि सन्ति । इमानि च सूत्राणि प्रायशः षड्विधेषु विभक्तानि भवन्ति।संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोधिकारश्च षड्विधं सूत्रलक्षणम्।।-इति धिया तत्र कानिचित् सूत्राणि सज्ञाः प्रकुर्वान्ति, अन्यानि च ताः संज्ञाः समाधृत्य विधानम्, नियमनम् अतिदेशं विधीयन्ते, अधिकार वा प्रदर्शयन्ति परिभाषाक्षेत्रं वा परिभाषन्ते। अष्टाध्याय्यां संज्ञासूत्राणि सन्ति, यानि सर्वतोभावेन विध्यङ्गभूतानि भवन्ति इति भाष्यकृता परीक्ष्य सिद्धान्ती व्युत्पादितः स्थापितश्च। विधिसूत्रसंघटनदशायां व्युत्पादितानि यानि पारिभाषिकपदान्यनस्यूतानि सन्ति, तेषां पारिभाषिकानां पदानां यथार्थबोधनं संज्ञासूत्रामुद्येश्यमात्यन्तिकं लक्ष्यं च प्रतिसूत्रं संज्ञाशास्त्रमुपस्थाय पर्य्यालोचनपुरस्सरं पदगतस्य अर्थस्य रहस्योन्मोचनं साधयति इयं सा प्रक्रिया संज्ञासूत्राणां सञ्चरणप्रक्रिया इति नाम्ना अवधीयते। संज्ञासूत्रं निरवधिकतया सर्वेषु सूत्रेषु उपतिष्ठत इत्येव शास्त्रविधानविचारः। एतस्य कृते सपादसप्ताध्यायी त्रिपादी[2] इति किमपि बन्धनं नोपकल्पयितुं शक्यते । चारचक्षुषराजानो भवन्तीतिरीत्या संज्ञासूत्रं परिभाषासूत्रं च सर्वत्र निर्वाधं प्रवृत्तिं लभते। किं बहुना संज्ञाशास्त्राणां कृते संचरणमुपायद्वयेन अङ्गीक्रियते। यथोद्येशं संज्ञापरिभाषं कार्यकालं संज्ञापरिभाषञ्चेति । व्याडितः आरभ्य शेषाद्रिसुद्धी इति यावत् परिभाषावचनद्वयं इदं सर्वत्र परिभाषाजगति विवेचनीयं वर्तते। व्याडिपरिभाषासूचनं यस्यविधेः निमित्तं नासी वाध्यते [3]।

परिभाषापाठः ८८-८९

शाकटानपरिभाषासूत्राणि- यथोद्येशं संज्ञापरिभाषम्[4]

कार्यकालं संज्ञापरिभाषम्[5]

जैनेन्द्रपरिभाषावृत्तिः- कार्यकालं संज्ञापरिभाषम्[6]

---

2 . पा.सू.- 8.2.1

3 . प. भा. सू - 45

4 . प. भा.(शाकटायनः) – 81

5 . तत्रैव - 82

6 . प. वृ.(जैनेन्द्रः) – 2

यथोद्येशं संज्ञापरिभाषम्[7]

भोजदेव- परिभाषासूत्राणि[8]

पुरुषोत्तमदेव-लघुपरिभाषावृत्तिः[9]

परिभाषापाठः[10]

सीरदेव-वृहत्परिभाषावृत्ति:[11]

नीलकण्ठदीक्षित-परिभाषाभाष्कर:[12]

श्री नागेशभट्टः-परिभाषेन्दुशेखरः- परिभाषापाठ:[13]

शेषाद्रिसुद्धी-परिभाषाभाष्करः[14]

**यथोद्येशपक्षः-** उद्येश्यमनतिक्रम्य यथोद्येशम् । उद्येश उपदेशदेश। यस्मिन् देशे सूत्रं पठितं विद्यते तं देशं प्रति विधिसूत्रं वाक्यार्थं बोधनाय प्रत्यागच्छति । अधिकरणसाधनस्य अयम् । यत् देश उपदिशते तद् देश एव वाक्यार्थे बोधे याते भविष्यति किञ्चित् अनेन प्रयोजनमिति ज्ञानमात्रेण प्रयोज्य सन्तुष्ट यथाशुत्रगृहीत प्रतिपत्रपक्ष इति ईंदूत्सूत्रे कैयटः एवञ्च यदा अनुद्दिश्य प्रयोजनविशेष प्रयोजनमात्रमभिसन्धाय भविष्यति किञ्चित् अनेन प्रयोजनमिति संज्ञाप्रयोजन प्रणीणते तदा सम्भवति एव अयं पक्षः। पक्षेऽस्मिन् आत्मसंस्काराय विधिसूत्राणि उपतिष्ठन्ते। तदुक्तं प्रदीपव्याख्याने यथोद्येशे प्रधानानि आत्मसंस्काराय सन्निधीयमानानि गुणभेदं प्रयुज्यन्त इति षष्ठीस्थाने योगा- इति सूत्रे भाष्ये एकदेशस्थं षद सर्वं शास्त्रमभिज्वलयति इति उपपादितं "एतद एव अभिकृत्य अधिकारो नाम त्रिप्रकार कश्चिद् एकदेशस्थः सर्वं शास्त्रमभुज्वलयति इति । यदा प्रदीपः सुप्रज्वलितः सर्वं शास्त्रमभिज्वलति इति।" अकाडारा अधिकारस्थ भ पद संज्ञाविषये यथोद्येशपक्ष: ग्रहणीयो दृश्यते ।

**कार्यकालपक्षः-** कार्येण काल्यते स्वसन्निधिः प्राप्यते इति कार्यकालः । तस्मिन्निति वाक्यार्थबोधे सप्तमी निर्देशादित्व क्व इति पर्य्यालोचनया सकल तत् सत् विधौपस्थितौ गुणभेदं परिकल्पनाय एकवाक्यताया एवं नियम कार्यकालपक्ष अनेन एव उपायेन पर्य्यालोचित पक्षेऽस्मिन् संज्ञाशास्त्रस्य न पृथक् वाक्यार्थबोध अपि तु विधिशास्त्र प्रदेशे वाक्यार्थेन सह एव। येन कारणेन अप्रगृहस्य उपाद्यां संज्ञासूत्राणां प्रवृत्तिः स्वीक्रियते । पक्षेऽस्मिन् आपत्ति बहुविधा उत्थापिता समाधानमपि आकाङ्क्षितम्।

---

7 . तत्रैव -

8 . प. सू. (भोजदेवः) – 222-223

9 . ल. प. वृ. – 205-206

10 . प.भा.पा. – 2-3

11 . बृ. प. वृ – 223,227

12 . प. भा. भा. – 228-229

13 . प. भा.शे. – 2-3

14 . प.भा.( शेषाद्रिसुद्धी) – 2-3

सूत्रमचेतनं कृत्रचित् स्थाने गमनं सम्भवति इति लोप कल्पनीयम्। पुनश्च व्यवहृतां अनेकदेशगमनेऽपि अभिजनीय देशव्यवहारस्य त्याग नैव स्वीक्रियते। विज्ञानं व्याकरणं साहित्यादिकञ्च तत्तद्विषयसमागतपारिभाषिकशब्दज्ञानेन सुगमतया बुध्यते इति सर्वैरनुभूयते । पतञ्जलिनापि "लध्वर्थ हि संज्ञाकरणम्"[15] इति मुक्तकण्ठेन प्रशंसितम्।

संज्ञासूत्राणि विध्यङ्गभूतानि इति भाष्यसिद्धान्तात् विधिशास्त्रस्य उपातानां पदानां तात्पर्यबोधनाय प्रयोजनीयत्वम् अङ्गीकृत्य प्रवर्त्तन्ते । परवर्तिनिकाले अष्टाध्याय्यां सूत्राणां परिकल्पनं जातम्। संक्षिप्तितेन संक्षेपनिष्ठेन मार्गेण अतएव पूर्वपरव्यवस्था पादकल्पनं सूत्रसंख्या चिन्तनं न किमपि सूत्रसंचरणाय प्रतिवन्धवीभूतम्। वाक्यार्थबोधे पदार्थबोधे कारणवत् संज्ञासूत्राणां विध्युपकारकत्वेन उपस्थितिरित्येव कल्पनं सूत्रात्मकरीत्या सूत्रतात्पर्यसाधने वैचित्र्यम्।

**सहायक ग्रन्थसूची :**


१. वैयाकरणभूषणसारः, दर्पण-प्रभासमेतः, चौखम्बा-संस्कृत-सीरीज-अफिस, वाराणसी, १९६९

२. वैयाकरणसिद्धान्तकौमुदी, मोतीलाल-बनारसी-दास, दिल्ली, २०००

३. वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्चिका-कलासम्वलिता चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९८५

४. व्याकरणदर्शनेर इतिहास, गुरुपदहालदार, कोलकाता १३५० वङ्गाव्दः।

५. शब्दशक्तिप्रकाशिका, चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९३५

६. प्रकरणपञ्चिका, शालिकनाथ, वेनारस हिन्दु युनिभर्सिटि, वाराणसी, १९६१

७. प्रौढमनोरमा, शब्दरत्न-भैरवी भावप्रकाश टीका सम्वलिता, चौखम्वा-संस्कृत-सीरीज, वाराणसी।

८. महाभाष्यम्. प. दधिरामशर्मा, चौखम्वा सुरभारती प्रकाशनम्, वाराणसी, १९८८

९. मानमेयेदय, श्रीदीननाथ त्रिपाठिनवर्तीर्थ, संस्कृत कलेज, कोलकाता, १९९०

१०. अष्टाध्यायी, ड. तपनशङ्करभट्टाचार्य, संस्कृत-बुक-डिपो, कोलकाता, २००४


[15] . म. भा .